Santiniketan, West Bengal, India

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 27-32
© 2021 IJSR
www.anantaajournal.com
Received: 20-06-2021
Accepted: 22-08-2021

**Dr. Sujay Das**
Former Ph.D Research Scholar, Department Sanskrit, Pali & Prakrit, Visva-Bharati, Santiniketan, West Bengal, India

**Corresponding Author:**
**Dr. Sujay Das**
Former Ph.D Research Scholar, Department Sanskrit, Pali & Prakrit, Visva-Bharati, Santiniketan, West Bengal, India

# सर्वङ्कषाटीकायां व्याकरणालोचनं गुरुत्वञ्च : संक्षिप्तमेकं परिशीलनम्

**Dr. Sujay Das**

**प्रबन्धसारः**

महाकविमाघप्रणीतम् अत्युकृष्टमेकं महाकाव्यं तावद् शिशुपालवधमिति। महाकाव्यस्यास्य बहवष्टीकाः सन्ति। तासु मल्लिनाथकृता 'सर्वङ्कषा' अतीवोत्कृष्टा टीका। टीकायामस्यां अन्वयमुखेन सर्वाणां श्लोकानां हृदयग्राही व्याख्या प्रदत्ता। पुनश्च प्रसङ्गक्रमेन तत्र व्याकरण-दर्शन-कामार्थ-सङ्गीत-कोष-धर्मालंकारशास्त्रादीनां बहुविधा आलोचनाः समुपवर्णिताः। तथापि व्याकरणगतालोचनमत्र अतीव समीचिनम्। अत्र माघकाव्यस्य बहुविधानां ख्याताख्यात-दुरुहशब्दाणां युक्तिनिष्ठव्याख्यानं परिदृष्टम्। व्याख्यानमेतद् शिशुपालवधस्य सम्यगार्थबोधे रसबोधे च अतीव सुकरम्।

**विषयसूचक-शब्दावली:** पञ्चमहाकाव्यम्, टीका, कारकविभक्तिः, समासः, प्रत्ययः, लिङ्गम्, व्याकरणम्, त्रिमुनिः, काव्यालंकारसूत्रवृत्तिः, सहृदयः, अव्ययपदम्, अभिधानम्, बाहुलकविधानम्।

## भूमिका

संस्कृतालंकृतपञ्चमहाकाव्येषु अनवद्यकाव्यरूपेण शिशुपालवधस्य माघकाव्यस्य वा विद्वद्समाजे प्रशस्यस्थानं विराजते। सुकविकीर्तिलाभस्य दुराशायां विंशतिसर्गेषु महाकविमाघेन प्रणीतमिदं काव्यम्। शब्दवैचित्र्यं खलु महाकाव्यस्यास्य महदाकर्षणम्। कविवरमाघस्य नवीन-नुतन-शब्दानां सङ्गीतात्मकझंकारोऽर्थबोधस्य प्रतीक्षारहितेऽपि समाकर्षति सर्वान् हृदयान्। अतः सहृदयानां समीपे माघकाव्यस्यावेदनमतीव जनप्रीयम्। कवि-काव्यसूचका विविधा प्रशस्तिरस्याः परिचयवाही। यथा -

'मेघे माघे गतं वयः', 'माघे सन्ति त्रयो गुणाः', 'नवसर्गगते माघे नव शब्दो न विद्यते' -इत्यादि। अत्यधिकजनप्रियताहेतोः महाकाव्यस्यास्य काले काले विद्वद्भिः बहवष्टीकाः विरचिताः। तासु 'सर्वङ्कषा' नाम्नी टीका विद्वद्समाजे भूयसी प्रशंसिता। दक्षिणभारतीय-महोपाध्याय-कोलाचल-मल्लिनाथसूरी अस्याः टीकायाः प्रणेता। टीकायामस्यामन्वयमुखेन माघकाव्यस्य सर्वश्लोकानां हृदयग्राही व्याख्या प्रदत्ता। पुनश्च प्रसङ्गानुसारेणात्र अलंकार-व्याकरण-दर्शन-काम-कोष-धर्म-सङ्गीत-ज्योतिष-नीतिशास्त्रादिनां आलोचनाऽपि परिदृश्यते। एवमालोचना न तु अमूलका अपि तु युक्तिसन्मता प्रासङ्गिकी चेति। यतश्चोक्तम् मल्लिनाथेन-

> "इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
> नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते।"[1]

वस्तुतः एतासामालोचनानां मध्ये व्याकरणसम्बन्धितालोचना अतीव मनोग्राही। विदग्धवैयाकरणस्यैव शिशुपालवधस्य बहुनां ख्याताख्यात-दुरुह-शब्दानां तथा पदानां व्याकरणात्मिकालोचना मल्लिनाथेनात्र प्रदत्ता। एवमालोचना शिशुपालवधस्य पदविश्लेषणे तथा अर्थबोधे रसबोधे च सहायका भवति।
टीकाकारमल्लिनाथेन बहुत्र बहुशः व्याकरणगतव्याख्यानं कृतं सर्वङ्कषाटीकायाम्। कारक-समास-प्रत्ययादिक्रमानुसारै अस्याः व्याख्यायाः विश्लेषणात्मिका पर्यालोचना उपयोगीता चेति लेखेऽस्मिन् प्रदत्ता। परन्तु अतिविस्तृतिभयाद् दिङ्मात्रनिदर्शनमत्र उपस्थापितम्।

**कारकविभक्तिः**

> "क्रमादमूं नारद इत्यबोधि सः।" (शिशुपालवधम् १/३)

शिशुपालवधस्य 'नारदः' इत्यस्मिन् पदे प्रथमाविभक्तिप्रसङ्गे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-
"नारद इत्यबोधि, नारदं बुद्धवानित्यर्थः। नारदस्य कर्मत्वेऽपि निपातशब्देनाभिहितत्वान्न द्वितीया। तिङामुपसंख्यानस्योपलक्षणत्वात्। यथाह वामनः - 'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्' इति।"
अत्र बुध्-धातोः कर्म 'नारद' इति शब्दः। अतः "अनभिहिते"(२/३/१)-सूत्रस्याधिकारे "कर्मणि द्वितीया"(२/३/२) इति सूत्रानुसारेणात्र कर्मणि द्वितीयायाः प्राप्तिरस्ति। परन्तु 'इति' अव्ययेन 'नारद' इति शब्दोऽभिहितत्वात् तत्र न द्वितीया, अपि तु प्रथमा स्यात् । निपातेनाभिधानविषये नास्ति पाणिनीयसूत्रम्। विषयेऽस्मिन् वार्तिकसूत्रमस्ति। तद् यथा- "तिङ्कृत्तद्धितसमासैः परिसंख्यानम्"[2] इति। साधारणतोऽत्र तिङ्-कृत्-तद्धित-समास इति विषयचतुष्टयेनाभिधानत्वं प्रतिपादितम्। तथापि 'परिसंख्यानम्' इति पदस्योपलक्षणत्वादत्र निपातेनापि अभिधानं भवति। 'सिद्धान्त-कौमुदी' इति ग्रन्थे उक्ते वार्तिकसूत्रे 'प्रायेण' इति पदं संयोजितम्। अतः "क्वचिन्निपातेनाभिधानम्" इति बृत्तिना भट्टोजीदीक्षितेन निपातेनाभिधानमुल्लिखितम्। विषयेऽस्मिन् वामनाचार्येनापि सुचारुसूत्रं प्रदर्शितम्। तद्यथा -

> "निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्।"[3]

टीकाकारमल्लिनाथेन सूत्रमिदं समुद्धृतम्। अनेन सूत्रानुसारेण निपातेन यदभिधानं भवति तत्तु प्रायिकं भवति। अर्थात् क्वचित् कदाचिदभिधानं भवति। अभिधानेऽस्मिन् कर्मणि न द्वितीया, अपि तु "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (२/३/४६)[4] इति सूत्रानुसारेण प्रथमाविभक्तिर्भवति। अतएव शिशुपालवधस्य 'नारदः' इति

पदमभिहितत्वात् प्रथमायाः प्रयोगः युक्तिसङ्गतः। अर्थात् 'नारदः' इत्यस्य प्रथमार्थः प्रकाशितः, न तु द्वितीयार्थः।

**समासः**

"कस्तूरिकामृगविमर्दसुगन्धिरिति.."।(शिशु. ४/६१)

शिशुपालवधस्य श्लोकस्यास्य 'सुगन्धिः' इत्यस्य पदस्य समासविश्लेषण-प्रसङ्गे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -
"कस्तूरिकामृगाणां विमर्देन संघर्षेण सुगन्धिः शोभनगन्धः। यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यमित्युक्तम्, तथापि 'निरङ्कुशाः कवयः' इत्यपर्यनुयोगः"।
'शोभनः गन्धः यस्य सः' - इत्यस्मिन् विग्रहे "शेषो बहुव्रीहिः"(२/२/२३) - सूत्रस्याधिकारे "अनेकमन्यपदार्थे"(२/२/२४) सूत्रानुसारेणात्र शोभनार्थकेन 'सु'-पदेन सह 'गन्धः' इति समर्थसुबन्तपदस्य मध्ये बहुव्रीहिसमासो भवति। तदनन्तरम्, "गन्धस्येदुत्पूतिसुसुरभिभ्यः" (५/४/१३५)[5] इति सूत्रेण 'सु'-शब्दात्परं 'गन्ध'-शब्दस्य अ-कारस्थाने इदादेशो भवति। वस्तुतः इदादेशोऽयं "गन्धस्येत्वे तदेकान्तग्रहणम्" (वा.३३६८) इति वार्तिकानुसारेण कर्तव्यमिति। अर्थात् 'गन्ध'-शब्दः यत्र अन्यपदार्थस्य एकदेशभूतस्तत्रैवायमिदादेशो भवति, न तु अन्यत्र। परन्तु 'गन्ध'-शब्दोऽत्रैकदेशभूतो नास्ति। यतः कस्तूरिकामृगाणां संघर्षेणैव गन्धस्यास्यो-त्पत्तिरिति। अतः 'सुगन्धिः' इति पदस्य इदादेशः कथं समर्थनीयः? प्रसङ्गेऽस्मिन् कविगणं प्रति उदारदृष्टिः मल्लिनाथेन प्रदत्ता। यतश्चोक्तं तेन -

"निरङ्कुशाः कवयः" इति।

अर्थात् साहित्यसृजने कवि-महाकाविनां पराधीनता नास्ति। अपारे काव्यसंसारे कविरेव प्रजापतिः। व्याकरणशृङ्खलमपि कदापि तेषां न शृङ्खलितम्। कविगणं प्रति वैयाकरणानाम् ईदृशी उदारदृष्टिः भूयसी प्रशंसनीया। अतः 'सुगन्धिः' इति पदस्य अर्थसम्बन्धिप्रामादिकता न धर्तव्या अपितु सादरेणैव ग्रहणीया।

"मनुष्यजन्मापि सुरासुरान्गुणैः।" (शिशु.१/३५)

सर्व० "मनुष्याज्जन्म यस्य स मनुष्यजन्मा भवान्। 'अवर्ज्यो हि बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः।"
'मनुष्यात् जन्म यस्य, सः'- इत्यस्मिन् विग्रहे षष्ठ्यर्थेऽत्र 'मनुष्यात्' इति पञ्चम्यन्तपदेन सह प्रथमान्तस्य 'जन्म'-पदस्य व्यधिकरणबहुव्रीहिसमासो भवति। सामान्यतः समानाधिकरणपदानामेव समासोऽयं भवति। कदापि कुत्रापि व्यधिकरनपदानामेव बहुव्रीहिसमासः लक्ष्यते। परन्तु व्यधिकरणबहुव्रीहिसमासविषये स्पष्टतया किञ्चित् पाणिनीयसूत्रं नोपलभ्यते। तथापि "सप्तमीविशेषणे बहुव्रीहौ" (२/२/३५)[6] इति ज्ञापकसूत्रं तत्र दृश्यते। व्यधिकरणबहुव्रीहिसमासविषये वामनाचार्यस्य सूत्रमस्ति-

"अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः।"[7]

सूत्रमिदं मल्लिनाथेन सर्वङ्कषाटीकायामुद्धृतम्। अनेन सूत्रेणैव 'मनुष्यजन्मा' इति पदे व्यधिकरणबहुव्रीहिसमासः मल्लिनाथेन समर्थितः। अतएव मल्लिनाथेन प्रदत्ता एवमुद्धृतिः खलु युक्तिसम्मता।

**प्रत्ययः**

"आपात्यसैनिकनिराकरणाकुलेन।" (शिशु.५/१५)

शिशुपालवधस्य इत्यस्मिन् पद्ये 'आपात्याः' इति पदस्य व्युत्पत्ति-प्रसङ्गे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -

"परिगृह्यापतन्तीत्यापात्याः स्वयमाक्रमितुमागच्छन्तः। 'भव्यगेय-' इत्यादिना कर्तरि ण्यदन्तो निपातः।"

'आपतन्ति इति'- इत्यस्मिनर्थे आ-पूर्वकस्य हलन्त-पत्-धातोरुत्तरं "ऋहलोर्ण्यत्" (३/१/१२४)[8]-सूत्रानुसारेणात्र 'ण्यत्'-पत्ययो भवति। साधारणतः "तयोरेवकृत्यक्तखलर्थाः"(३/४/७०)[9] इति सूत्रेण कृत्य-क्त-खलर्थाः च प्रत्ययाः भावे कर्मणि च विहिताः भवन्ति। परन्तु अत्र 'आपात्याः' इति ण्यदन्तपदं विकल्पे कर्तृवाच्ये प्रयुक्तमस्ति। अनेन कारणरूपेण "भव्यगेय-प्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा" (३/४/६८) इति पाणिनीयसूत्रस्योल्लेखः मल्लिनाथेन कृतः। अर्थात् भव्य, गेय, प्रवचनीय, उपस्थानीय, जन्य, आप्लाव्य, आपात्य चेति शब्दाः अनेन सूत्रानुसारेण विकल्पे कर्तरि निपात्यन्ते। अतः 'आपात्याः' इति पदस्यात्र कर्तृवाच्यत्वमपि विकल्पे निपातनेन सिद्धम्। अर्थात् शिशुपालवधस्य पद्येऽस्मिन् कर्तृवाच्यत्वमेव ग्रहणीयमिति।

**अव्ययम्**

"नहि न विदितखेदमेतदीयस्तनजघनोद्वहने तवापि चेतः"। (शिशु. ७/१२)

शिशुपालवधस्य पद्येऽस्मिन् 'न' इति अव्ययद्वयस्य युगपत् प्रयोगोऽस्ति। अव्ययद्वयस्यास्य अर्थविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -

"नहीति। तव चेतोऽपि एतदीयस्तनजघनोद्वहने विदितखेदमनुभूतखेदं नेति न, किन्तु वेत्त्येवेत्यर्थः। अतः कथं शीघ्रमायास्यतीति भावः। 'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः।"

पद्येऽस्मिन् दृश्यते, नायिकां विहाय स्वाभिमानवशतः नायकः पदसञ्चालनेन शीघ्रं गच्छति। नायिका तु शनैः शनैः तस्य पश्चादागच्छति। उन्नतपयोधरेण नितम्ववहनश्रमेन चैव नायिकाया ईदृशी धीरगतिः। अस्याः कारणमपि नायकस्य खलु सुविदितम्। भावमेनं सम्यक् प्रतिपादयन् पद्येऽस्मिन् महाकविमाघेन 'न' इति अव्ययद्वयस्य युगपत् प्रयोगः कृतः। 'न' इति अव्ययपदं तावद् प्रतिषेधार्थम्। तथापि एकस्मिन् वाक्ये प्रतिषेधद्वयस्य प्रयोगे सति सम्भावनिषेधस्य निवर्तनं भवति। प्रसङ्गेऽस्मिन् टीकाकारमल्लिनाथेन वामनाचार्यस्योद्धृतिः प्रदत्ता। तद् यथा -

"संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ।"[10]

वामनाचार्यस्य मतेऽपि प्रतिषेधद्वयेन सम्भावनिषेधस्य निवर्तनं भवति। अतः पद्येऽस्मिन् 'न' इति अव्ययपदद्वयस्य युगपत् प्रयोगेन सम्यकतया नायकस्य विदितार्थस्य भावः व्याक्तो भवति।

**लिङ्गम्**

"व्रीड़मसंमुखोऽपि रमणैरपहृतवसना"। (शिशु. ४/६७)

शिशुपालवधस्य पद्येऽस्मिन् 'व्रीड़म्' इति पदस्य लिङ्गं प्रतिपादयन् सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -

"व्रीडं त्रपाम्। यद्यपि 'गुरोश्च हलः' इति स्त्रियामप्रत्ययः। ...तथापि तत्र स्त्रित्वाविवक्षायां बाहुलकत्वान्नपुंसकत्वं च। अत एव 'अविधौ गुरोः स्त्रियां बहुलविवक्षा' इति वामनः।"

हलन्त-व्रीड्-धातोः उत्तरमत्र "गुरोश्च हलः"(३/३/१०३)[11] इत्यनेन सूत्रेण अ-प्रत्ययः विहितो भवति। स्त्रिलिङ्गे अ-प्रत्यये कृते टाप् इति प्रत्ययेन 'व्रीड़ा' ईदृशं स्त्रीलिङ्गान्तं पदं भविष्यति। परन्तु अत्र 'व्रीड़म्' एतादृशं क्लीवलिङ्गान्तं पदं प्रयुक्तमस्ति। अतः स्त्रिलिङ्गे अ-प्रत्ययोऽत्र कथं

समर्थनीयः। प्रसङ्गेऽस्मिन् टीकाकारमल्लिनाथस्य मतमस्ति, 'व्रीड़म्' इत्यस्मिन् पदे स्त्रित्वस्याविवक्षा लक्ष्यते। पुनश्च अ-प्रत्ययोऽपि बाहुलविधानानुसारेण प्रयुक्तो भवति। व्याख्यामेनां समर्थयितुं टीकाकारमल्लिनाथेन वामनाचार्यस्योद्धृतिः प्रदत्ता। तद् यथा -

"अविधौ गुरोः स्त्रियां बहुलविवक्षा।"[12]

वामनचार्यस्य मते, "गुरोश्च हलः"(३/३/१०३) इति पाणिनीयसूत्रं तावद् बाहुलकत्वाद् प्रयुक्तं भविष्यति। अत एव शिशुपालवधस्य 'व्रीड़म्' इति क्लीवलिङ्गान्तस्य पदस्य प्रयोगः युक्तिसङ्गतोऽस्ति।

**आत्मनेपदविधानम्**

"कुथेन नागेन्दमिवेन्द्रवाहनम्।"(शिशु.१/८)

सर्व० "इन्द्रस्य वाहनमिति स्वस्वामिभावमात्रस्य विवक्षितत्वात् 'वाहनमाहितात्' इति न णत्वम्। यथाह वामनः- 'नेन्द्रवाहनशब्दे णत्वमाहितत्वस्याविवक्षितत्वात्' इति।"
"वाहनमाहितात्" (८/४/८)[13] इत्यनेन सूत्रेण आहितवाची यत् पूर्वपदं तत्स्थान्निमित्तादुत्तरस्य वाहननकारस्य ण-कार आदेशो भवति। अस्मिन् स्थले इन्द्रवाहनशब्दे णत्वस्य निमित्तम्(र्) अस्ति। परन्तु आहितार्थ[14] अविवक्षितोऽस्ति। अर्थात् 'इन्द्र-स्वामिक-वाहनम्' इत्येवमर्थोऽत्र प्रकाशितः। अतोऽत्र न-कारस्य ण-कारः आदेशो न भवति। एवं व्याख्यायाः समर्थने टीकाकारेण मल्लिनाथेन वामनाचार्यस्य मतमुद्धृतम्। मतमिदं किञ्चिद् अन्यप्रकारेण प्राप्तं 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे। अत्र प्राप्तसूत्रम् एवमेवास्ति-.

"नेन्द्रवाहने णत्वमाहितत्वस्याविवक्षितत्वात्।"[15]

अर्थात् वामनमतेऽपि आहितत्वस्याविवक्षितत्वात् 'इन्द्रवाहन'-शब्दे णत्वं न भवति। अतएवात्र णत्वाभावोऽपि युक्तिसम्मतः। वामनमतेन विषयोऽयं स्पष्टीकृतः।

**उपसंहृतिः**

कविवरमाघस्य वैदग्ध्य तथा पाण्डित्यस्य सर्वोत्कृष्टनिदर्शनं तावद् शिशुपालवधमहाकाव्यमिति। महाकाव्यस्यास्य सम्यगार्थबोधे 'सर्वङ्कषा' नाम्नी टीका अतीव जनप्रिया। टीकायामस्यां शिशुपालवधस्य बहुविधानां शब्दानां पदानां वा व्याकरणगता व्याख्या बहुत्र परिलक्षिता। व्याख्येयं केवलं व्याकरणस्योल्लेखमात्रं नास्ति, अपि तु व्याकरणस्य भावगम्भीरविश्लेषणस्य युक्तिनिष्ठः प्रयासोऽस्ति। शब्दानां तथा पदानां अथबोधे ईदृशः प्रयासोऽतीव प्रशंसनीयः। मल्लिनाथस्य व्याख्या सर्वदा शुद्धपाणिनीयव्याकरणानुसारी। त्रिमुनिव्याकरणस्य विविध-सूत्र-वार्तिक-भाष्यानां प्रयोगः छत्रे छत्रे दृश्यते सर्वङ्कषाटीकायाम्। एतस्मादृते बहुविधदुरुहशब्दानां विश्लेषणावसरे काशिका-न्यास-प्रदीप-काव्यालंकारसूत्रवृत्ति-आख्यातचन्द्रिकादिनां ग्रन्थानां सिद्धान्तोऽप्यत्र समुपन्यस्तः। व्याकरणादृशा येषां पदानां प्रयोगः प्रामादिकरूपेण प्रतीतः तेषां विश्लेषणावसरे कविनां स्वाधीनमननं प्रति प्राधान्यं परिलक्ष्यते। कविगणं प्रति ईदृशी उदारदृष्टिः सत्मेव प्रशंसनीया। एवंरूपेण माघकाव्यस्य सम्यगार्थबोधे सर्वङ्कषीकायाः व्याकरणालोचनस्य महती भूमिकाऽस्ति-विषयेऽस्मिन् नास्ति सन्देहः।

**तथ्यसूत्राणि**

1. सर्वङ्कषा, भूमिकाश्लोकः ८।
2. 'कर्मणि द्वितीया' (२/३/२) इत्यस्य सूत्रस्य दीक्षितोक्ता वृत्तिः।
3. काव्यालंकारसूत्रवृत्तिः, ५/२/२२।
4. "नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिंगमात्राधिक्ये

संख्यामात्रे च प्रथमा स्यात्। उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम्। अलिंगा नियतलिंगाश्च प्रातिपदिकार्थमात्रे इत्यस्योदाहरणम्।" (सिद्धान्तकौमुदी)

5. "उत् पूति सु सुरभि इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तो बहुव्रीहौ समासे।"(काशिकावृत्तिः)
6. "सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः।" (लघुसिद्धान्तकौमुदी)
7. का.सू.वृ.५/२/१८
8. "ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् स्यात्। कार्यम्। वर्ष्यम्।"(सिद्धान्तकौमुदी)
9. "तयोरेव भावकर्मणोः कृत्यसंज्ञकाः क्तखलर्थाश्च प्रत्यया भवन्ति।"(काशिकावृत्तिः)
10. का.सू.वृ. ५/१/९
11. "गुरुमतो हलन्तात् स्त्रियामकारः स्यात्।"(सिद्धान्तकौमुदी)
12. का.सू.वृ. ५/२/४९
13. "आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्।"(सिद्धान्तकौमुदी)
14. "वाहने यदारोपितमुह्यते तदाहितमुच्यते।"(काशिकावृत्तिः)
15. का.सू.वृ.५/२/९१

**ग्रन्थसन्दर्भाः**


1. त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। *काशिका* (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी : तारा प्रिण्टिङ्ग वकर्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
2. दूर्गाप्रसाद सम्पादकः। शिवदत्तेन वासुदेवेन च संशोधितम्। *शिशुपालवधम्*(सर्वङ्कषाटीका-समेतम्)। बोम्बे : निर्णयसागरप्रेस, १९०५ ।
3. नगेन्द्र सम्पादकः। *काव्यालंकारसूत्रवृत्तिः*। दिल्ली : आत्माराम एण्ड संस, १९५४।
4. भट्टाचार्य्य, तपनशङ्कर, सम्पादकः। *लघुसिद्धान्तकौमुदी*। कोलकाता : संस्कृत बुक डिपो, २००४।
5. मिश्र, रमाशंकर, सम्पादकः। *अष्टाध्यायीसूत्रपाठः*। दिल्ली : मोतीलाल बनारसीदास, २००५।
6. रङ्गनाथस्वामी, हरगोविन्द च सम्पादकौ। *आख्यातचन्द्रिका*। वाराणसी : चौखम्बा संस्कृत सीरीज आफीस, १९३६।
7. शर्मा, गिरीधर, परमेश्वरानन्दशर्मा च सम्पादकौ। *वैयाकरणसिद्धान्तकौमुदी*(बालमनोरमा-तत्त्वबोधिनी-समेता)। दिल्ली : मोतीलाल बनारसीदासः, प्रथमभागः १९७७, द्वितीयभागः १९८२, तृतीयभागः १९७७, चतुर्थभागः १९७९।